# ROLL DESCRIPTIONS

| | | | |
|---|---|---|---|
| ROLL NO. WITH CENTRE CODE | 001 0478 | DATE OF FILMING | 18-04-91 |
| NAME OF THE CENTRE/COLLECTION | Saraswati Bhawan Library, Varanasi | | |
| DETAILS OF CATALOGUE (SUB/VOL.) | Veda | | |
| LANGUAGE | Sanskrit | SCRIPT | Devanagari, Chitram |
| MATERIAL | Paper | TOTAL FRAMES | 602 |
| ORIGINAL FILM USED | Kodak | FOOTAGE | |

## RETAKES INFORMATION

| MSS. NO. | FOLIO NO. | REMARKS |
|---|---|---|
| — | — | — |

Indira Gandhi National Centre for the Arts

प्रवेश सं० ८५८७२

विषयः कर्मकाण्डम्

क्रम सं० १११

ग्रन्थकार

नाम रुद्रन्यासपद्धती:

पत्र सं० 9-20

श्लोक सं०

अक्षर सं० (पंक्तौ) २४

पंक्ति सं० (पृष्ठे) ७

आकारः ८.९×३.८

लिपिः दे-ना-

आधारः का-

वि० विवरणम् पू.

स-१८८५ आ-२३२३

पी० एस० यू० पी०--७७ एस० सी० ई०--१६५१--५०,०००

008472

Indira Gandhi National
Centre for the Arts

१

॥श्रीगणेशायनमः॥श्रीशंकरायनमः॥आचम्यप्राणानायम्य॥देश
कालौसंकीर्त्य॥आसनं।ॐमि॥अथातःपंचाङ्गरुद्राणान्यासपूर्व
कंजपहोमार्चनविधिंव्याख्यास्यामः।अस्यरुद्रस्यप्रश्नस्यअनुष्टुप्
छन्दस्य।अघोरऋषिःसंकर्षणमूर्त्तिस्वरूपोयोसावादित्यःपरपुरु

३ वर षःसएवरुद्रोदेवता॥अग्निक्रतुमायामिष्टकायाःशतरुद्रीयजपे
विनियोगः॥सकलस्यरुद्राध्यायस्यश्रीरुद्रोदेवता॥एकागायत्री १
छंदस्तिस्रोनुष्टुभस्तिस्रःपङ्क्तयःसप्तानुष्टुभोद्वेजगत्यौ॥ॐकार

परमात्मादेवता॥दैवीगायत्रीछंदः १

जंसुषुम्नाशक्तिःशिवायेतिजंपरमेष्टीऋषिःममसमस्तपापक्षया
र्थेजपेविनियोगः॥ॐस्र।यातेरुद्रशिवातनूरघोरापापकाशिनी
तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि॥शि[illegible]येनमः॥
अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि॥तेषाऽसहस्रयोजनेवधर
न्वानितन्मसि॥शिरसेनमः॥सहस्राणिसहस्रशोयेरुद्राअधिभू
म्यां॥तेषाऽस॰सि॥ललाटायनमः॥हंसःशुचिषद्वसुरंतरिक्षसद्धो
तावेदिषदतिथिर्दुरोणसत्नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा

Indira Gandhi National
Centre for the Arts

२ अध्रिज्याऽस्तं बृहत्॥ भ्रुवोर्मध्यायनमः॥ त्र्यंबकंयजामहेसुगंधिं
पुष्टिवर्द्धनं॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ नेत्रा
भ्यांनमः॥ नमःस्रुत्यायचपथ्यायच॥ कर्णाभ्यांनमः॥ मानस्तोके
तनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः॥ वीरान्मानोरु
द्रभामितोवधीर्हविष्मंतोनमसाविधेमते॥ नासिकायेनमः॥ अवत
त्यधनुस्त्वं सहस्राक्षशतेषुधे॥ निशीर्यशल्यानांमुखाशिवोनःसु २
मनाभव॥ मुखायनमः॥ नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमा

कंठायनमः॥

चराः॥ तेषां सं०॥ नीलग्रीवाःशितिकंठादिवं रुद्राउपश्रिताः॥ तेषां
२उप सं०॥ कंठायनमः॥ नमस्तेअस्त्वायुधायानाततायधृष्णवे॥ उभाभ्यां
नमो मुततेबाहुभ्यांतवधन्वने॥ बाहुभ्यांनमः॥ यातेहेतिर्मीढुष्टमहस्तेबभू
वतेधनुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज॥ उपबाहुभ्यांन भु
मः॥ येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः॥ तेषां सं०॥ हस्ताभ्यां
नमः॥ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥ भवेभवेनाति
भवेभवस्वमांभवोद्भवायनमः॥ अंगुष्ठाभ्यांनमः॥ वामदेवायनमोज्ये

Indira Gandhi National
Centre for the Arts

३ ष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोब
लविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायन
मोमनोन्मनायनमः॥तर्जनीभ्यांनमः॥अघोरेभ्योथघोरेभ्योघोरघोर
तरेभ्यः॥सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥मध्यमाभ्यांन
मः॥तत्पुरुषायविद्महेमहादेवायधीमहि॥तन्नोरुद्रप्रचोदयात्॥अ
नामिकाभ्यांनमः॥ईशानः सर्वविद्यानामीश्वरः सर्वभूतानांब्रह्माधि ३
पतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तु॥सदाशिवोम्॥कनिष्ठिका

भ्यांनमः॥नमोवः किरिकेभ्योदेवानांहृदयेभ्योनमोविक्षीणकेभ्यो
न्व देवानांहृदयेभ्योनमोविचिन्वत्केभ्योदेवानांहृदयेभ्योनमआनिर्हते
भ्योदेवानांहृदयेभ्योनमआमीवत्केभ्योदेवानांहृदयेभ्यः॥हृदयाय
नमः॥नमोगणेभ्योगणपतिभ्यश्चवोनमः॥ज्येष्ठायनमः॥नमोहिरण्य
बाहवेसेनान्येदिशांचपतयेनमः॥पार्श्वाभ्यांनमः॥विज्यंधनुःकप
र्दिनोविशल्योबाणवाँउत॥अनेशन्नस्यइषवआभुरस्यनिषंगधिः
॥जगत्यायनमः॥हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकआ

Indira Gandhi National
Centre for the Arts

४ सीत॥सद्योधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥नाभ्यैन
मः॥मीढुष्टमशिवंतमःशिवोनःसुमनाभव॥परमेवृक्षआयुधंनिधा
युकृत्तिंवसानआचरपिनाकंबिभ्रदागहि॥कण्ठेनमः॥येभूतानामधि
पतयोविशिखासःकपर्दिनः॥तेषांसं०॥मुखायनमः॥सद्योराजातवे
दः॥अक्षरंब्रह्मसंमितं॥वेदानांशिरउत्तमं॥जातवेदसेसिरसेमात॥
स्वमंत्रस्लभूर्भुवःस्वरोम्॥जातवेदसेसुनवामसोममरातीयतोनिदहा ४
तिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ताम

ग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां॥दुर्गांदेवींशरणमहं
प्रपद्येसुतरसितरसेनमः॥अग्नेत्वंपारयानव्योअस्मान्स्वस्तिभिरति
दुर्गाणिविश्वा॥पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः॥
विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि॥अग्नेअत्रि
वन्नमसागृणानोस्माकंबोध्यवितातनूनां॥पृतनाजितंसह
मानमुग्रमग्निंहुवेमपरमात्सधस्थात्॥सनःपर्षदतिदुर्गाणिविश्वा
क्षामद्देवोअतिदुरितात्यग्निः॥अपानायनमः॥मानोमहांतमुतमानो
अर्भकंमानउक्षंतमुतमानउक्षितं॥मानोवधीःपितरंमोतमातरं

Indira Gandhi National
Centre for the Arts

॥प्रियामानःस्तनुवोरुद्ररिषः॥ऊरुभ्यांनमः॥एषतेरुद्रभागस्तंजुषस्व
५ तेनावसेनपरोमूजवतोती॥यवततधन्वा॥पिनाकहस्तःकृत्तिवासाः॥
जानुभ्यांनमः॥संसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिता
भिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहामित्रांअपबाधमानः॥जं
घाभ्यांनमः॥विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्॥स
र्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु॥गुल्फाभ्यांनमः॥येपथांपथि
रक्षयऐलबृदायव्युधः॥तेषांस०॥पादाभ्यांनमः॥अध्यवोचदधिव ५
क्ताप्रथमोदैव्योभिषक्॥अहींश्चसर्वांजंभयन्सर्वाश्चयातुधान्यः॥

ककचायनमः॥नमोबिल्मिनेचकवचिनेच॥उपकचायनमः॥नमो
अस्तुनीलग्रीवायसहस्राक्षायमीढुषे॥अथोयेअस्यसत्वानोहं
तेभ्योकरंनमः॥तृतीयनेत्रायनमः॥प्रमुंचधन्वनस्त्वमुभयोरार्त्नि
योर्ज्यां॥याश्चतेहस्तइषवःपराताभगवोवप॥अस्त्रायफट्॥यएता
वंतश्चभूयांसश्चदिशोरुद्रावितस्थिरे॥तेषांस०॥इतिदिग्बंधः॥
नमोभगवतेरुद्रायेतिनमस्कारंन्यसेत्॥ॐमूर्ध्नेनमः॥नंनासिकायै
नमः॥मोंललाटायनमः॥भंमुखायनमः॥गंकंठायनमः॥वंहृदयाय
नमः॥तेंदक्षिणहस्तायनमः॥रुंवामहस्तायनमः॥द्रांनाभ्यैनमः॥यं

Indira Gandhi National Centre for the Arts

पाराभ्यांनमः॥सद्योजातंप्र॰नमः॥पादाभ्यांनमः॥वामदेवाय॰यनमः॥
६ ऊरुभ्यांनमः॥अघोरेभ्योथ॰रूपेभ्यः॥हृदयायनमः॥तत्पुरुषाय॰यात्॥
मुखायनमः॥ईशानः स॰शिवोम्॥मूर्ध्नेनमः॥हंसहंसेतियोब्रूयाद्धंह हंसायनमः परमहंसाय नमः
सोनामसदाशिवः॥एवंन्यासविधिंकृत्वाततःसंपुटमारभेत्॥अथ
संपुटीकरणं॥आदौप्रणवमुच्चार्यव्याहृतिंप्रणवान्वितं॥बीजमंत्रं
समुच्चार्यमंत्रांतेबीजमाचरेत्॥ललाटेनेत्रेकर्णेचमुखबाहुल्य
नासिके॥हृदयेनाभिमूर्ध्नीचपादयोर्हृदिहिकं॥ॐभूः त्रातारमिंद्रम ६
वितारमिंद्रंहवेहवेहवंशूरमिंद्रंहुवेनुशक्रंपुरुहूतमिंद्रंस्वस्ति
सु समस्तव्याहृतिःसर्वत्र

नोमघवाधात्विंद्रः॥ॐइंद्रायनमः॥ॐललाटायनमः॥ॐभुवः॥ॐत्वन्नो
अग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः॥यजिष्ठोवन्हितमः
शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥ॐअग्नयेनमः॥ॐनेत्राय
नमः॥ॐस्वः॥ॐस्योनःपंथामभयंकृणोतु॥यस्मिन्नक्षत्रेयमेतिराजा ७
यस्मिन्नेनमभ्यषिंचंतदेवाः॥तदस्यचित्रंहविषायजाम॥ॐयमा म
यनमः॥ॐकर्णाभ्यांनमः॥ॐमहः॥ॐअसुन्वंतमयजमानमिच्छस्तेनस्ये
त्यांतस्करस्यान्वेषि॥अन्यमस्मदिच्छसा[illegible]इत्यानमोदेवी॥निर्ऋतेतु
त

Indira Gandhi National Centre for the Arts

७ र्यमस्तु॥ॐनिर्ऋतिनमः॥ॐमुखायनमः॥ॐजनः॥ॐतत्वायामिब्रह्मणावं
दमानस्तदाशास्ते यजमानोहविर्भिः॥अहेडमानोवरुणेहबोध्युरुश
ंसमानआयुःप्रमोषीः॥ॐवरुणायनमः॥ॐबाहुभ्यांनमः॥ॐतपः॥ॐ
आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञं॥वायोअ
स्मिन्हविषिमादयस्वयूयंपातस्वस्तिभिःसदानः॥ॐवायवेनमः॥ॐवं
नास्तिकायेनमः॥ॐसत्यं॥ॐवयंसोमव्रतेतवमनस्तनूषुबिभ्रतः ७
प्रजावंतोसचेमहि॥ॐसोमायनमः॥ॐहृदयायनमः॥ॐतत्सवि

तुर्वरेण्यं॥ॐतमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहे
वयं॥पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये॥ॐई
शानायनमः॥ॐरुंनाभ्येनमः॥ॐभर्गोदेवस्यधीमहि॥ॐअस्मेरुद्राने
हनापर्वतासोवृत्रहत्येभरहूतौसजोषाः॥यःशंसतेस्तुवतेधायि
पज्रइंद्रज्येष्ठाअस्मांअवंतुदेवाः॥ॐ[illegible]ायनमः॥ॐअंतरिक्षायम
ध्येनमः॥ॐधियोयोनःप्रचोदयात्॥ॐस्योनापृथिवीभवानृक्षरानिवे
शनी॥यच्छानःशर्मसप्रथाः॥ॐपृथिव्यैनमः॥ॐपादाभ्यांनमः॥इतिसंपुट

Indira Gandhi National Centre for the Arts

८ करणं ॥ अथदिग्दिशः ॥ ॐत्रातारमिंद्र॰ रुक्त ॥ इंद्राय॰ ॥ ॐत्वन्नोअग्ने॰ अ
ग्नये॰ ॐसुगंनःपंथा॰ यमायनमः ॥ ॐअसुन्वंतम॰ निर्ऋतये॰ ॥ ॐतत्वा
यामिब्रह्मणा॰ वरुणायनमः ॥ ॐआनोनियुद्भिः ॥ वायवेनमः ॥ ॐवय
ꣳसोमव्रते॰ ॥ सोमायनमः ॥ ॐतमीशानंजगत॰ ॥ ईशानाय॰ ॥ ॐअस्मेरुद्रामे
हनापर्वता॰ रुद्रायनमः ॥ ॐस्योनापृथिवि॰ पृथिव्यैनमः ॥ त्वगस्थिगतैःपा
पैप्रमुच्यंते ॥ सर्वभूतेष्वपराजितोभवति ॥ ततोभूतप्रेतपिशाचब्रह्म ८
राक्षसयमदूतशाकिनीडाकिनीसर्पश्वापदतस्कराद्युपद्रवाद्युपघाताः
यक्षगंधर्व

यजमानंरक्षंतु

सर्वेज्वलंतंपश्यंतु ॥ मांरक्षंतु ॥ मनोज्योतिर्जुषतामाज्यंविछिन्नंयज्ञ
ꣳसमिमंदधातु ॥ याइष्टाउषसोनिम्रुचश्वताःसंदधामिहविषाघृते
नं ॥ गुरवाय॰ ॥ ॐअबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमु
षासं ॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमछ ॥ उशन
यनमः ॥ ॐमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं ॥ क
विꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ हृदयायनमः ॥
ॐमर्माणितेवर्मभि[illegible]स्यामिसोमस्त्वाराजामृतेनाभिवस्तां ॥ उरो
श्छा ।

Indira Gandhi National
Centre for the Arts

९ वरीयोवरीवस्तिअस्तुजयंतंत्वामनुमदंतुदेवाः॥सुखायनमः॥जा
तवेदायदिवापावकोसि॥वैश्वानरोयदिवावैद्युतोसि॥शंप्रजा
भ्योयजमानायलोकं॥ऊर्जंपुष्टिंददभ्यावववृत्स्व॥शिरसेस्वाहा॥ आत्मरक्षा कर्त व्या२

अत्र ब्रह्मान्व गतोनुवा

यज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैति॥दूरंगमंज्योतिषांज्यो
तिरेकंतन्मेमनःशिवसंकल्पमस्तु॥येनकर्माण्यपसोमनीषिणो
यज्ञेकृण्वंतिविदथेषुधीराः॥यदपूर्वंयक्षमंतःप्रजानांतन्मेम ९
नःशि०॥यत्प्रज्ञानमुतचेतोधृतिश्चयज्योतिरंतरमृतंप्रजासु॥

यस्मान्नऋतेकिंचनकर्मक्रियतेतन्मेमनःशिवसं०॥येनेदंभूतं
भुवनंभविष्यत्परिगृहीतममृतेनसर्वं॥येनयज्ञस्तायतेसप्तहो
तातन्मे०॥यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभा
विवाराः॥यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मे०॥सुषारथिरश्वा
निवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनइव॥हृत्प्रतिष्ठंयदजिरं
यविष्ठंतन्मे०॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥ऊर्वारुकमिव
बंधनान्मृत्योर्मुक्षीयमामृतात्॥ॐनमोभगवतेरुद्रायशिवसंक

Indira Gandhi National
Centre for the Arts

१० ल्पं्ंहृस्यायनमः॥सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्॥सभू
मिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं।पुरुषएवेदं्ंसर्वंयद्भूतंयच्चभव्यं॥
उतामृतत्वस्येशानः।यदन्नेनातिरोहति॥एतावानस्यमहिमातो अ२
ज्यायां्श्चपूरुषः॥पादोस्यविश्वाभूतानि॥त्रिपादस्यामृतंदिवि॥
त्रिपादूर्ध्वउदैत्पुरुषः॥पादोस्येहाभवत्पुनः।ततोविष्वङ्व्यक्राम
त्साशनानशनेअभि।तस्माद्विराडजायत।विराजोअधिपूरुषः। १०
सजातोअत्यरिच्यत।पश्चाद्भूमिमथोपुरः॥यत्पुरुषेणहविषा।

अं१ यु१

देवायज्ञमतन्वत।वसंतोस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः॥सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः।देवायद्यज्ञंतन्वानाः।अबध्नं
न्पुरुषंपशुं।तंयज्ञंबर्हिषिप्रौक्षन्।पुरुषंजातमग्रतः॥तेनदेवाअ
यजंत।साध्याऋषयश्चये।तस्माद्यज्ञात्सर्वहुतः।संभृतंपृषदाज्यं॥
पशूं्स्तां्श्चक्रेवायव्यान्॥आरण्यान्ग्राम्याश्चये॥तस्माद्यज्ञा
त्सर्वहुतः।ऋचःसामानिजज्ञिरे।छंदां्सिजज्ञिरेतस्मात्।यजुस्त
स्मादजायत।तस्मादश्वाअजायंत।येकेचोभयादतः।गावोहजज्ञि

Indira Gandhi National Centre for the Arts

तस्मात

१३ रे।तस्मोज्जाताअजावयः।यत्पुरुषंव्यदधुः।कतिधाव्यकल्पयन्।मु
खंकिमस्यकोबाहू।कांऊरूपादाउच्येते।ब्राह्मणोस्यमुखमासीत्।बा
हूराजन्यःकृतः।ऊरूतदस्ययद्वैश्यः।पद्भ्यांःशूद्रोअजायत।चंद्रमामन
सोजातः।चक्षोःसूर्योअजायत।मुखादिंद्रश्चाग्निश्च।प्राणाद्वायुरजा
यत।नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्त्तत।पद्भ्यांभूमिर्दिशः
श्रोत्रात्।तथालोकांःअकल्पयन्।वेदाहमेतंपुरुषंमहांतं।आदि १३
त्यवर्णंतमसस्तुपारे।सर्वाणिरूपाणिविचित्यधीरः।नामानिकृत्वा

भिवदन्यदास्ते।धातापुरस्ताद्यमुदाजहार।शक्रःप्रविद्वान्प्रदिशश्चत
स्रः।तमेवंविद्वानमृतइहभवति।नान्यःपंथाअयनायविद्यते।यज्ञे
नयज्ञमयजंतदेवाः।तानिधर्माणिप्रथमान्यासन्।तेहनाकंमहि
मानःसचंते।यत्रपूर्वेसाध्याःसंतिदेवाः।ॐनमोभगवतेरुद्रायपुरुष
सूक्तःशिरसेस्वाहा।ॐअद्भ्यःसंभृतःपृथिव्येरसाच्च।विश्वकर्मणः
समवर्त्तताधि।तस्यत्वष्टाविदधद्रूपमेति।तत्पुरुषस्यविश्वमाजा
नमग्रे।वेदाहमेतंपुरुषंमहांतं।आदित्यवर्णंतमसःपरस्तात्।तमे

Indira Gandhi National
Centre for the Arts

१२ वंविद्वानमृतंइहभवति॥नान्यःपंथाविद्यतेयनाय॥प्रजापतिश्चर
तिगर्भेअंतः॥अजायमानोबहुधाविजायते॥तस्यधीराःपरिजानं
तियोनिं॥मरीचीनांपदमिच्छंतिवेधसः॥योदेवेभ्यआतपति॥योदे
वानांपुरोहितः॥पूर्वोयोदेवेभ्योजातःनमोरुचायब्राह्मये॥रुचंब्रा
ह्म्यंजनयंतः॥देवाअग्रेतदब्रुवन्॥यस्त्वैवंब्राह्मणोविद्यात्॥तस्य
देवाअसन्वशे॥श्रीश्चतेलक्ष्मीश्चपत्न्यौ॥अहोरात्रेपार्श्वेनक्षत्रा १२
णिरूपं॥अश्विनौव्यात्तं॥इष्टंमनिषाण॥अमुंमनिषाण॥सर्वंमनि

षाण॥ॐनमोभगवतेरुद्राय॥उत्तरनारायणंशिखायैवौषट्॥आ
शुःशिशानोवृषभोनयुध्मोघनाघनःक्षोभणश्चर्षणीनां॥संक्रं
दनोनिमिषएकवीरःशतंसेनाअजयत्साकमिंद्रः॥संक्रंदनेना
निमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिंद्रेणजयत
तत्सहध्वंयुधोनरइषुहस्तेनवृष्णा॥सइषुहस्तैःसनिषंगिभिर्व
शीसंस्रष्टासयुधइंद्रोगणेन॥संसृष्टजित्सोमपाबाहुशर्ध्यू
र्ध्वधन्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहामित्रा

Indira Gandhi National Centre for the Arts

२३ द्रअपबाधमानः॥प्रभंजंसेनाःप्रमृणोयुधाजयंन्नस्माकमेध्यविताारथा
नां॥गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥इमंस
जाताअनुवीरयध्वमिंद्रंसखायोअनुसंरभध्वं॥बलविज्ञायः
स्थविरःप्रवीरःसहस्वान्वाजीसहमानउग्रः॥अभिवीरोअभिसत्वा
सहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥अभिगोत्राणिसहसागाहमा
नोदायोवीरःशतमन्युरिंद्रः॥दुश्च्यवनःपृतनाषाडयुध्योस्माकं २३
सेनाअवतुप्रयुत्सु॥इंद्रआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरएतु

सोमः॥देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे॥इंद्र
स्यवृष्णोःवरुणस्यराज्ञआदित्यानांमरुतांशर्द्धउग्रं॥महामनसां
भुवनच्यवानांघोषोदेवानांजयतामुदस्थात्॥अस्माकमिंद्रःस
मृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु॥अस्माकंवीराउत्तरेभवं
त्वस्मानुदेवाअवताहवेषु॥उद्धर्षयमघवन्नायुधान्युत्सत्वनां
मामकानांमहांसि॥उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतां
मेतुघोषः॥उपप्रेतजयतानरःस्थिरावःसंतुबाहवः॥इंद्रोवःशर्म

Indira Gandhi National
Centre for the Arts

१४ यच्छत्त्वनाधृष्ण्यायथासंथ॥अवंसृष्टापरापतशरव्येब्रह्मसंशितं॥ग
च्छामित्रान्प्रविशमैषांकंचनोच्छिषः॥मर्माणितेवर्मभिश्छादयामि॥
सोमस्त्वाराजामृतेनाभिवस्तां॥उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वा
मनुमदंतुदेवाः॥यत्रबाणाःसंपतंतिकुमाराविशिखाइव॥इंद्रोनस्त
त्रवृत्रहाविश्वाहाशर्मयच्छतु॥ॐनमोभगवतेरुद्रायअप्रतिरथंकवचा
यहुं॥त्वमग्नेरुद्रोअसुरोमहोदिवः॥त्वंशर्धोमारुतंपृक्षईशिषे॥त्वं
वातैररुणैर्यासिशंगयः॥त्वंपूषाविधतःपासिनुत्मना॥देवादेवेषु १४
श्री

श्रयध्वं॥प्रथमाद्वितीयेषुश्रयध्वं॥द्वितीयास्तृतीयेषुश्रयध्वं॥
तृतीयाश्चतुर्थेषुश्रयध्वं॥चतुर्थाःपंचमेषुश्रयध्वं॥पंचमाःष
ष्ठेषुश्रयध्वं॥षष्ठाःसप्तमेषुश्रयध्वं॥सप्तमाअष्टमेषुश्रयध्वं॥
अष्टमानवमेषुश्रयध्वं॥नवमादशमेषुश्रयध्वं॥दशमाएकादशे
षुश्रयध्वं॥एकादशाद्वादशेषुश्रयध्वं॥द्वादशास्त्रयोदशेषुश्रयध्वं
त्रयोदशाश्चतुर्दशेषुश्रयध्वं॥चतुर्दशाःपंचदशेषुश्रयध्वं॥पंच
दशाःषोडशेषुश्रयध्वं॥षोडशाःसप्तदशेषुश्रयध्वं॥सप्तदशा

२५ अष्टादशेषुश्रयध्वं ॥ अष्टादशा एकोनविंशेषुश्रयध्वं ॥ एकोनवि
ंशाविंशेषुश्रयध्वं ॥ विंशा एकविंशेषुश्रयध्वं ॥ एकविंशा द्वावि
ंशेषुश्रयध्वं ॥ द्वाविंशास्त्रयोविंशेषुश्रयध्वं ॥ त्रयोविंशाश्च
तुर्विंशेषुश्रयध्वं ॥ चतुर्विंशाः पंचविंशेषुश्रयध्वं ॥ पंचविं
शाषड्विंशेषुश्रयध्वं ॥ षड्विंशाः सप्तविंशेषुश्रयध्वं ॥ सप्तवि
ंशा अष्टाविंशेषुश्रयध्वं ॥ अष्टाविंशा एकोनत्रिंशेषुश्रयध्वं २५
एकोनत्रिंशास्त्रिंशेषुश्रयध्वं ॥ त्रिंशा एकत्रिंशेषुश्रयध्वं ॥

एकत्रिंशाद्वात्रिंशेषुश्रयध्वं ॥ द्वात्रिंशास्त्रयस्त्रिंशेषुश्रयध्वं ॥
देवास्त्रिरेकादशा स्त्रिस्त्रयस्त्रिंशाः ॥ उत्तरे भवत ॥ उत्तरवर्त्मानु
उत्तरसत्वानः ॥ यत्कामइदं जुहोमि ॥ तन्मे समृध्यतां ॥ वयं स्याम पत
योरयीणां ॥ भूर्भुवः स्वः स्वाहा ॥ ॐ नमो भगवते रुद्राय शतरुद्रीयमित्य
स्त्राय फट् ॥ एवं पंचांग सकृज्जपेत् ॥ अष्टांगं प्रणम्य ॥ हिरण्यगर्भः
समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्या
मुतेमां कस्मै देवाय हविषा विधेम ॥ यः प्राणतो निमिषतो महित्वै

दोर्भ्यां पद्भ्यां च जानुभ्यां मुरसा शिरसा तथा ॥ कायेन मनसा वाचा प्रणामोऽष्टविधः स्मृतः ॥

Indira Gandhi National Centre for the Arts

२६ कृष्णाजाजगतोबभूव॥यईशेतेअस्यद्विपदश्चतुष्पदः॥कं॥ब्रह्मंज
ज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः॥सबुध्नियाउपमाअ
स्यविष्ठाःसतश्चयोनिमसतश्चविवः॥महीद्यौःपृथिवीचनइमंयज्ञं
मिमिक्षतां॥पिपृतान्नोभरीमभिः॥उपश्वासयपृथिवीमुतद्यांपुरुत्रा
तेमनुतांविष्ठितंजगत्॥सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसे
धशत्रून्॥अग्नेनयसुपथाराये अस्मान्विश्वानिदेववयुनानिवि २६
द्वान्॥युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम॥का

मा

तेअग्ने।यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मानं॥अच्छावसूनि
कृण्वंनस्मेनर्यापुरूणि॥यज्ञोभूत्वायज्ञमासीद॥स्वांयोनिंजातवे
दोभुवआजायमानःसक्षयएहि॥यंयावस्त्वायमेपरिमौमपरीज्ञाभि
र्घृतवद्भिश्चहव्यैः॥तेभिर्नोअग्नेअमितैर्महोभिःशतंपूर्भिरायसीभि
र्नियाहि॥इमंयमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः॥आ
त्वामंत्राःकविशस्तावहंत्वेनाराजन्हविषामादयस्व॥अथेन्द्रश्चोजपे
त्॥प्रजननेब्रह्मातिष्ठतु॥पादयोर्विष्णुस्तिष्ठतु॥हस्तयोर्हरिस्तिष्ठ

Indira Gandhi National Centre for the Arts

२७ तु॥बाह्वोरिंद्रस्तिष्ठतु॥जठरे अग्निस्तिष्ठतु॥हृदये शिवस्तिष्ठतु॥कंठे
वसवस्तिष्ठंतु॥वक्रे सरस्वती स्तिष्ठतु॥नासिकयोर्वायुस्तिष्ठतु॥न
यनयोश्चंद्रादित्यौ तिष्ठेतां॥कर्णयोरश्विनौ तिष्ठेतां॥ललाटे रुद्रा देवी
स्तिष्ठंतु॥मूर्ध्न्यादित्यास्तिष्ठंतु॥शिरसि महादेवस्तिष्ठतु॥शिखायां
चामुंडा वासुदेवस्तिष्ठतु॥पृष्ठे पिनाकी तिष्ठतु॥पुरतः शूली तिष्ठतु॥पार्श्व
योः शिवाशंकरौ तिष्ठेतां॥सर्वतो वायुस्तिष्ठतु॥ततो बहिः सर्वतो २८
ग्निर्ज्वालामालापरिवृतास्तिष्ठंतु॥सर्वेष्वंगेषु सर्वा देवता यथास्था
यथा

नानि तिष्ठंतु॥मां रक्षंतु॥इति यथालिंगमंगानि संमृज्य॥अग्निर्मे वा
चि श्रितः॥वाग्घृदये॥हृदयं मयि॥अहममृते अमृतं ब्रह्मणि॥वा
युर्मे प्राणे श्रितः॥प्राणो हृदये॥हृदयं मयि॥अहममृते अमृतं ब्रह्मणि।
सूर्यो मे चक्षुषि श्रितः॥चक्षुर्हृदये॥हृदयं मयि॥अहममृते॥अमृतं
ब्रह्मणि॥चंद्रमा मे मनसि श्रितः॥मनो हृदये॥हृदयं मयि॥अहमम्
ते॥अमृतं ब्रह्मणि॥दिशो मे श्रोत्रे श्रिताः॥श्रोत्रं हृदये॥हृदयं मयि॥
अहममृते॥अमृतं ब्रह्मणि॥आपो रेतसि श्रिताः॥रेतो हृदये॥हृदयं
मे

Indira Gandhi National
Centre for the Arts

१८ मयि॥अहममृतं।अमृतंब्रह्मणि॥पृथिवीमेशरीरेश्रिता॥शरीरं
हृदये॥हृदयंमयि॥अहममृतं।अमृतंब्रह्मणि॥ओषधीवनस्पत-
योमेलोमसुश्रितः॥लोमानिहृदये॥हृदयंमयि॥अहममृतं।अमृ
तंब्रह्मणि॥इंद्रोमेबलेश्रितः।बलंहृदये।हृदयंमयि॥अहममृतं।
अमृतंब्रह्मणि।पर्जन्योमेमूर्ध्निश्रितः॥मूर्द्धाहृदये॥हृदयंमयि॥अ-
हममृतं।अमृतंब्रह्मणि।ईशानोमेमन्यौश्रितः।मन्युहृदये।हृदयं १८
मयि।अहममृतंअमृतंब्रह्मणि॥आत्मामआत्मनिश्रितः॥आ-

त्माहृदये॥हृदयंमयि॥अहममृतं।अमृतंब्रह्मणि॥पुनर्मआत्मा
पुनरायुरागात्।पुनःप्राणःपुनराकूतमागात्॥वैश्वानरोरश्मिभि
र्वावृधानः।अंतस्तिष्ठतुअमृतस्यगोपाः॥अथात्मानंशिवात्मानं
पंचास्यंचिंतयेद्बुधः॥त्रिलोचनंचतुर्बाहुंसर्वाभरणभूषितं॥नी-
लग्रीवंशशांकांकंशुद्धस्फटिकसन्निभं॥नागयज्ञोपवीतंचव्या
घ्रचर्मोत्तरीयकं॥२॥कमंडलुंधरंदेवमक्षमालाधरंविभुं।वर
दाभयहस्तंचनमज्ञानवरप्रदं॥३॥वृषपृष्ठसमारूढंमुमादेहार्द्धधा

Indira Gandhi National
Centre for the Arts

१९ रिणं॥दुर्द्दर्शंकपिलजटंशिखामुद्योतकारकं॥४॥अमृतेनाप्लुतंहृष्टं
दिव्यभोगसमन्वितं॥दिग्देवतासमायुक्तंसुरासुरनमस्कृतं॥५॥
नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं॥सर्वव्यापिनमीशानंरुद्रं
वैविश्वरूपिणं॥६॥एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत्॥
आराधितोमनुष्यैस्त्वंसिद्धैर्देवासुरादिभिः॥७॥आराधयामिभ- १९
क्त्यात्वांमांगृहाणमहेश्वर॥ॐआत्वावहंतुहरयःसचेतसःश्वेतै-
रश्वैःसहकेतुमद्भिःवाताजवैर्बलवद्भिर्मनोजवैरायाहिशीघ्रंमम

२० हव्यायशर्वोम्॥एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजव-
तोतीह्यवततधन्वापिनाकहस्तःकृत्तिवासाः॥ॐशिवोभव॥
सन्निहितोभव॥प्रसन्नोभव॥वरदोभव॥ॐशांतिःशांतिःशान्तिः
॥समाप्तेयंपद्धतिः॥❁॥संवत् १८८५ श्रावणस्यसितपक्षेद्वादश्यां
भृगुवासरे॥शालिग्रामेणलिपितंरुद्रस्यन्यासपद्धतिं॥१॥दीक्षित
जीश्रीजीवणजीकस्यार्थम्शुभम्॥लेखकपाठकयोःकल्याणंचास्तु॥ २०
छ श्री छ श्री छ श्री छ श्री छ
स्वामिंस्सर्वजगन्नाथयावत्पूजावसानकं॥तावत्त्वंप्रीतिभावेनदेवेस्मिन्संन्निधोभव॥१॥

Indira Gandhi National Centre for the Arts

९८४९

Indira Gandhi National
Centre for the Arts